# योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ६९



एकोनसप्ततितमः सर्गः ६९

श्रीवसिष्ठ उवाच ।

सर्वदा सर्वसंस्थेन सर्वेण सह तिष्ठता ।

सर्वकर्मरतेनापि मनः कार्यं विजानता ।।१

न सक्तमिह चेष्टासु न चिन्तासु न वस्तुषु ।

नाकाशे नाप्यधो नाग्रे न दिक्षु न लतासु च ।। २

न बहिर्विपुलाभोगे न चैवेन्द्रियवृत्तिषु ।

नाभ्यन्तरे न च प्राणे न मूर्धनि न तालुनि ।। ३

न भ्रूमध्ये न नासान्ते न मुखे न च तारके ।

नान्धकारे न चाभासे न चास्मिन्हृदयाम्बरे ।। ४

न जाग्रति न च स्वप्ने न सुषुप्ते न निर्मले ।

नासिते न च वा पीतरक्तादौ शबले न च ।। ५

न चले न स्थिरे नादौ न मध्ये नेतरत्र च ।

न दूरे नान्तिके नाग्रे न पदार्थे न चात्मनि ।। ६

न शब्दस्पर्शरूपेषु न मोहानन्दवृत्तिषु ।

न गमागमचेष्टासु न कालकलनासु च ।। ७

केवलं चिति विश्रम्य किंचिच्चेत्यावलम्बिनि ।

सर्वत्र नीरसमिव तिष्ठत्वात्मरसं मनः ।। ८

तत्रस्थो विगतासङ्गो जीवोऽजीवत्वमागतः ।

व्यवहारमिमं सर्वं मा करोतु करोतु वा ।। ९

अकुर्वन्नपि कुर्वाणो जीवः स्वात्मरतिः क्रियाः ।

क्रियाफलैर्न संबन्धमायाति खमिवाम्बुदैः ।। १०

अथवा तमपि त्यक्त्वा चेत्यांशं शान्तचिद्घनः ।

जीवस्तिष्ठतु संशान्तो ज्वलन्मणिरिवात्मनि ।। ११

निर्वाणमात्मनि गतः सततोदितात्मा

जीवोऽरुचिर्व्यवहरन्नपि रामभद्र ।

नो सङ्गमेति गतसङ्गतया फलेन

कर्मोद्भवेन सहतीव च देहभारम् ।। १२

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषूपशमप्रकरणे शान्तिसमायातयोगोपदेशो नामैकोनसप्ततितमः सर्गः६९